# ಕರ್ನಾಟಕ ಪ್ರೌಢ ಶಿಕ್ಷಣ ಪರೀಕ್ಷಾ ಮಂಡಳಿ,

ಮಲ್ಲೇಶ್ವರಂ, ಬೆಂಗಳೂರು – ೩.

## 2019-20 ನೇ ಸಾಲಿನ ಪಠ್ಯಾಧಾರಿತ

## ಎಸ್.ಎಸ್.ಎಲ್.ಸಿ. ಪರೀಕ್ಷೆ

ಶಾಲಾ ಅಭ್ಯರ್ಥಿಗಳಿಗಾಗಿ

ಪ್ರಶ್ನೆ ಪತ್ರಿಕೆಯ ಪರಿಷ್ಕೃತ ವಿನ್ಯಾಸ

ವಿಷಯ : ಪ್ರಥಮ ಭಾಷೆ ಸಂಸ್ಕೃತ

## प्रथमभाषा – संस्कृतम्

## प्रथमभाषा संस्कृतम्

**पीठिका** – प्रत्येकं छात्रस्य जीवने प्राथमिकं माध्यमिकं च शिक्षणम् अत्यन्तं महत्त्वं स्थानम् आवहति । यतः इदमेव उन्नतशिक्षणं प्रति आधारशिलेव भवति ।

प्राथमिकवर्षदशकस्य औपचारिकशिक्षणस्य अन्ते छात्राणाम् अधिगमनानुभवस्य गुणात्मकाधिगमनस्य च निकषोपला परीक्षा एव कर्नाटक-प्रौढशिक्षण-परीक्षा-मण्डल्या प्रचाल्यमाना (S.S.L.C.) एस्.एस्.एल्.सि. परीक्षा वर्तते । इयं च परीक्षा शिक्षणसमितेः आशयं, पोषकाणां निरीक्षाः, शिक्षकाणां वृत्तिकौशलं, छात्राणां बौद्धिकसामर्थ्यं च प्रकाशयति । अत एव शिक्षणे समयानुगुणं कानिचन परिवर्तनानि भवन्ति ।

पद्यवस्तूनां परिष्करणं तदनुगुणं पाठ्यपुस्तकेषु परिवर्तनं, शिक्षकाणां मार्गदर्शनम्, आवश्यकतानुगुणं मौल्यमापने परिवर्तनम्, एते सर्वे अंशाः शिक्षणस्य स्तरं वर्धयितुं साहाय्यकाः भवन्ति ।

निरूपणात्मकमौल्यमापनानि, सङ्कलनात्मकमौल्यमापने च निरन्तरं तथा व्यापकमौल्यमापनस्य आधारस्तम्भाः भवन्ति । निरूपणात्मकं मौल्यमापनं छात्राणाम् अधिगमनं क्रियाकलापद्वारा अन्विष्य, शिक्षकेषु बोधनकौशल्यानां संवर्धने आनुकूल्यं जनयति । छात्राणां बौद्धिकस्तरस्य मापने च साधनपरीक्षा प्रमुखं स्थानं भजते । शैक्षणिकवर्षस्य अन्ते क्रियमाणे सङ्कलनात्मके मौल्यमापने साधनपरीक्षा अपि अन्तर्भवति । तादृश – परीक्षायाः भागभूते प्रश्नपत्रे अपि परिवर्तनं आवश्यकम् । एवं अस्मिन् वर्षे परिष्कृतं पाठ्यपुस्तकं आधारीकृत्य मौल्यमापनं गुणात्मकं कर्तुं प्रश्नपत्रस्य विन्यासे परिवर्तनं कृतम् ।

### प्रमुखांशाः

२०१९–२०२० तमस्य शैक्षणिकवर्षस्य एस्.एस्.एल्.सि. प्रसिद्धपरीक्षायाः प्रथमभाषासंस्कृतस्य प्रश्नपत्रस्य विन्यासे परिष्कारः कृतः । अस्य प्रमुखानि उद्देश्यानि एवं भवन्ति ।

१. छात्रेषु कण्ठपाठविधानस्य दूरीकरणम् ।
२. स्मरणात्मकानां अंशानां न्यूनीकरणम् ।
३. परीक्षासमये जायमानस्य परीक्षा–अव्यवहारस्य प्रतिबन्धनम् ।
४. वस्तुनिष्ठप्रश्नानां, अतिलघूत्तराणां प्रश्नानां संख्यायां न्यूनीकरणम् ।
५. भाषासामर्थ्यवर्धनाय दीर्घोत्तरयुक्तप्रश्नानां प्रदानम् ।
६. अङ्काधारितं बोधनक्रमम् अपनेतुं घटकानुगुणं अङ्कवितरणं विहाय विषयाधारिता (Theme based) अङ्कवितरणव्यवस्था अनुसृता ।
७. गतवर्षस्य प्रश्नपत्रे A,B,C इति विभागाः आसन् । ते विभागाः इतः परं न भवन्ति ।
८. प्रश्नपत्रे आरोहणक्रमेण अङ्कयोजनं कृतम् ।

### प्रयोजनानि

१. छात्राः अङ्काधारितं पठनं, अध्यापकाः अङ्काधारितं पाठनं, पोषकाः अङ्काधारितं चिन्तनं दूरीकुर्वन्ति ।
२. पाठ्यपुस्तके प्रदत्तान् सर्वान् पाठान् शिक्षकाः पाठयन्ति । छात्राः पठन्ति च ।

३. गुणात्मकं चिन्तनं, बोधनं, मौल्यमापनानि च भवन्ति ।

४. छात्रेषु लेखनं, पठनं, भाषणं, श्रवणम् प्रभृतीनि भाषाकौशलानि अभिवर्धन्ते

५. दीर्घोत्तरयुक्तानां प्रश्नानां कृते छात्रैः अधिकम् अवधानं दीयते ।

६. छात्रेषु विषयाभिव्यक्तिसामर्थ्यम् विवर्धते ।

## प्रश्नपत्रस्य विन्यासे कृतं परिवर्तनम्
## विषयः – प्रथमभाषा संस्कृतम्

गरिष्ठाङ्काः : १०० अवधिः – ३ घण्टाः

**Regular Fresh**

### १. उद्दिष्टानुगुणं प्रामुख्यम्

| 2018-19 | | | 2019-20 | | |
|---|---|---|---|---|---|
| **उद्दिष्टानि** | **प्रतिशतम्** | **प्रदत्ताङ्काः** | **उद्दिष्टानि** | **प्रतिशतम्** | **प्रदत्ताङ्काः** |
| स्मरणम् | 25 | 25 | स्मरणम् | 21 | 21 |
| धारणम् | 37 | 37 | धारणम् | 36 | 36 |
| अभिव्यक्तिः | 34 | 34 | अभिव्यक्तिः | 39 | 39 |
| प्रशंसा | 04 | 04 | प्रशंसा | 04 | 04 |
| **आहत्य** | **100** | **100** | **आहत्य** | **100** | **100** |

१. स्मरणात्मकप्रश्नानां चत्वारः अङ्काः न्यूनीकृताः ।

२. धारणात्मकप्रश्नानामपि एकः अङ्कः न्यूनीकृतः ।

३. अभिव्यक्तौ पञ्च–अङ्काः अधिकाः कृताः ।

### २. विषयानुगुणं प्रामुख्यम्

| 2018-2019 | | | | 2019-2020 | | | |
|---|---|---|---|---|---|---|---|
| **विषयाः** | **प्रतिशतम्** | **प्रदत्ताङ्काः** | **प्रश्नसंख्या** | **विषयाः** | **प्रतिशतम्** | **प्रदत्ताङ्काः** | **प्रश्नसंख्या** |
| **गद्यम्** | 30 | 30 | 16 | **गद्यम्** | 29 | 29 | 16 |
| **पद्यम्** | 29 | 29 | 16 | **पद्यम्** | 30 | 30 | 13 |
| **पूरक – पाठाः** | 07 | 07 | 04 | **पूरक – पाठाः** | 09 | 09 | 05 |
| **अपठित–गद्यम्** | 04 | 04 | 01 | **अपठित–गद्यम्** | 04 | 04 | 01 |
| **व्याकरणम्** | 30 | 30 | 13 | **व्याकरणम्** | 28 | 28 | 10 |
| **आहत्य** | **100** | **100** | **50** | **आहत्य** | **100** | **100** | **45** |

१. गद्यभागे एकः अङ्कः न्यूनः जातः ।

२. पद्यभागे एकः अङ्कः अधिकः जातः ।

३. पूरकपाठानाम् कृते अङ्कद्वयम् अधिकं दत्तम् ।

४. व्याकरणविभागे अङ्कद्वयं न्यूनीकृतम् ।

३. प्रश्नानुगुणं प्रामुख्यम्

| 2018-19 | | | | | 2019-20 | | | | |
|---|---|---|---|---|---|---|---|---|---|
| प्रश्नानां स्वरूपम् | प्रतिशतम् | प्रदत्ताः अङ्काः | प्रश्नानां संख्याः | अपेक्षितः समयः | प्रश्नानां स्वरूपम् | प्रतिशतम् | प्रदत्ताः अङ्काः | प्रश्नानां संख्याः | अपेक्षितः समयः |
| वस्तुनिष्ठः | 14 | 14 | 14 | 20 | वस्तुनिष्ठः | 10 | 10 | 10 | 15 |
| अतिलघूत्तरम् | 11 | 11 | 11 | 15 | अतिलघूत्तरम् | 07 | 07 | 07 | 15 |
| लघूत्तरम् | 18 | 18 | 09 | 35 | लघूत्तरम् | 20 | 20 | 10 | 35 |
| दीर्घोत्तरम्–१ | 27 | 27 | 09 | 45 | दीर्घोत्तरम्–१ | 33 | 33 | 11 | 45 |
| दीर्घोत्तरम्–२ | 20 | 20 | 05 | 30 | दीर्घोत्तरम्–२ | 20 | 20 | 05 | 35 |
| दीर्घोत्तरम्–३ | 10 | 10 | 02 | 20 | दीर्घोत्तरम्–३ | 10 | 10 | 02 | 20 |
| **आहत्य** | **100** | **100** | **50** | **165+15** | **आहत्य** | **100** | **100** | **45** | **165+15** |

१. वस्तुनिष्ठप्रश्नेषु चत्वारः प्रश्नाः न्यूनाः जाताः ।

२. अतिलघूत्तरप्रश्नेषु चत्वारः प्रश्नाः न्यूनाः जाताः ।

३. लघूत्तरे अङ्कद्वयं, दीर्घोत्तरं –१ मध्ये षट् अङ्काः अधिकाः जाताः ।

४. प्रश्नानां संख्यासु अपि परिवर्तनं जातम् । आहत्य पञ्चप्रश्नाः न्यूनाः जाताः ।

४. प्रश्नस्तराः

| 2018-19 | | 2019-20 | |
|---|---|---|---|
| **स्तराः** | **प्रतिशतम्** | **स्तराः** | **प्रतिशतम्** |
| सुलभः | 30 | सुलभः | 30 |
| साधारणः | 50 | साधारणः | 50 |
| कठिनः | 20 | कठिनः | 20 |

१. अत्र किमपि परिवर्तनं न कृतम्

५. **प्रश्नप्रकाराः अङ्कवितरणञ्च**

| 2018-19 | | 2019-20 | |
|---|---|---|---|
| **प्रश्नप्रकाराः** | **अङ्कयोजनम्** | **प्रश्नप्रकाराः** | **अङ्कयोजनम्** |
| बहुविकल्पः | 10 x 1 = 10 | बहुविकल्पः | 6 x 1 = 06 |
| चतुर्थपदम् | 4 x 1 = 04 | चतुर्थपदम् | 4 x 1 = 04 |
| एकवाक्यम् | 11 x 1 = 11 | एकवाक्यम् | 7 x 1 = 07 |
| लघूत्तरम् –2-3 वाक्यानि | 9x 2 = 18 | लघूत्तरम् –2-3 वाक्यानि | 10x 2 = 20 |
| दीर्घोत्तरम् –१<br>3-4/5-6 वाक्यानि | 9 x 3 = 27 | दीर्घोत्तरम् –१<br>3-4/5-6 वाक्यानि | 11 x 3 = 33 |
| दीर्घोत्तरम् –२<br>10 वाक्यानि | 5x 4 = 20 | दीर्घोत्तरम् –२<br>10 वाक्यानि | 5x 4 = 20 |
| दीर्घोत्तरम् –३<br>10 वाक्यानि | 2x 5 = 10 | दीर्घोत्तरम् –३<br>10 वाक्यानि | 2x 5 = 10 |
| **आहत्य** | **50 / 100** | **आहत्य** | **45 / 100** |

१. प्रश्नप्रकारेषु विशेषरूपेण परिवर्तनं न जातम् । अङ्कयोजने परिवर्तनं कृतम् ।

२. लघूत्तरप्रश्नानां दीर्घोत्तरप्रश्नानां च पर्यायप्रश्नाः भवन्ति ।

# ಕರ್ನಾಟಕ ಪ್ರೌಢ ಶಿಕ್ಷಣ ಪರೀಕ್ಷಾ ಮಂಡಳಿ,

ಮಲ್ಲೇಶ್ವರಂ, ಬೆಂಗಳೂರು – ೩.

## 2019-20 ನೇ ಸಾಲಿನ ಪಠ್ಯಾಧಾರಿತ

## ಎಸ್.ಎಸ್.ಎಲ್.ಸಿ. ಪರೀಕ್ಷೆ

ಖಾಸಗಿ ಅಭ್ಯರ್ಥಿಗಳಿಗಾಗಿ

ಪ್ರಶ್ನೆ ಪತ್ರಿಕೆಯ ಪರಿಷ್ಕೃತ ವಿನ್ಯಾಸ

ವಿಷಯ : ಪ್ರಥಮ ಭಾಷೆ ಸಂಸ್ಕೃತ

# प्रथमभाषा – संस्कृतम्

## प्रथमभाषा संस्कृतम्

**पीठिका –** प्रत्येकं छात्रस्य जीवने प्राथमिकं माध्यमिकं च शिक्षणम् अत्यन्तं महत्त्वं स्थानम् आवहति । यतः इदमेव उन्नतशिक्षणं प्रति आधारशिलेव भवति ।

प्राथमिकवर्षदशकस्य औपचारिकशिक्षणस्य अन्ते छात्राणाम् अधिगमनानुभवस्य गुणात्मकाधिगमनस्य च निकषोपला परीक्षा एव कर्नाटक–प्रौढशिक्षण–परीक्षा–मण्डल्या प्रचाल्यमाना (S.S.L.C.) एस्.एस्.एल्.सि. परीक्षा वर्तते । इयं च परीक्षा शिक्षणसमितेः आशयं, पोषकाणां निरीक्षाः, शिक्षकाणां वृत्तिकौशलं, छात्राणां बौद्धिकसामर्थ्यं च प्रकाशयति । अत एव शिक्षणे समयानुगुणं कानिचन परिवर्तनानि भवन्ति ।

पद्यवस्तूनां परिष्करणं तदनुगुणं पाठ्यपुस्तकेषु परिवर्तनं, शिक्षकाणां मार्गदर्शनम्, आवश्यकतानुगुणं मौल्यमापने परिवर्तनम्, एते सर्वे अंशाः शिक्षणस्य स्तरं वर्धयितुं साहाय्यकाः भवन्ति ।

निरूपणात्मकमौल्यमापनानि, सङ्कलनात्मकमौल्यमापने च निरन्तरं तथा व्यापकमौल्यमापनस्य आधारस्तम्भाः भवन्ति । निरूपणात्मकं मौल्यमापनं छात्राणाम् अधिगमनं क्रियाकलापद्वारा अन्विष्य, शिक्षकेषु बोधनकौशल्यानां संवर्धने आनुकूल्यं जनयति । छात्राणां बौद्धिकस्तरस्य मापने च साधनपरीक्षा प्रमुखं स्थानं भजते । शैक्षणिकवर्षस्य अन्ते क्रियमाणे सङ्कलनात्मके मौल्यमापने साधनपरीक्षा अपि अन्तर्भवति । तादृश – परीक्षायाः भागभूते प्रश्नपत्रे अपि परिवर्तनं आवश्यकम् । एवं अस्मिन् वर्षे परिष्कृतं पाठ्यपुस्तकं आधारीकृत्य मौल्यमापनं गुणात्मकं कर्तुं प्रश्नपत्रस्य विन्यासे परिवर्तनं कृतम् ।

### प्रमुखांशाः

२०१९–२०२० तमस्य शैक्षणिकवर्षस्य एस्.एस्.एल्.सि. प्रसिद्धपरीक्षायाः प्रथमभाषासंस्कृतस्य प्रश्नपत्रस्य विन्यासे परिष्कारः कृतः । अस्य प्रमुखानि उद्देश्यानि एवं भवन्ति ।

१. छात्रेषु कण्ठपाठविधानस्य दूरीकरणम् ।
२. स्मरणात्मकानां अंशानां न्यूनीकरणम् ।
३. परीक्षासमये जायमानस्य परीक्षा–अव्यवहारस्य प्रतिबन्धनम् ।
४. वस्तुनिष्ठप्रश्नानां, अतिलघूत्तराणां प्रश्नानां संख्यायां न्यूनीकरणम् ।
५. भाषासामर्थ्यवर्धनाय दीर्घोत्तरयुक्तप्रश्नानां प्रदानम् ।
६. अङ्काधारितं बोधनक्रमम् अपनेतुं घटकानुगुणं अङ्कवितरणं विहाय विषयाधारिता (Theme based) अङ्कवितरणव्यवस्था अनुसृता ।
७. गतवर्षस्य प्रश्नपत्रे A,B,C इति विभागाः आसन् । ते विभागाः इतः परं न भवन्ति ।
८. प्रश्नपत्रे आरोहणक्रमेण अङ्कयोजनं कृतम् ।

### प्रयोजनानि

१. छात्राः अङ्काधारितं पठनं, अध्यापकाः अङ्काधारितं पाठनं, पोषकाः अङ्काधारितं चिन्तनं दूरीकुर्वन्ति ।
२. पाठ्यपुस्तके प्रदत्तान् सर्वान् पाठान् शिक्षकाः पाठयन्ति । छात्राः पठन्ति च ।
३. गुणात्मकं चिन्तनं, बोधनं, मौल्यमापनानि च भवन्ति ।

४. छात्रेषु लेखनं, पठनं, भाषणं, श्रवणम् प्रभृतीनि भाषाकौशलानि अभिवर्धन्ते

५. दीर्घोत्तरयुक्तानां प्रश्नानां कृते छात्रैः अधिकम् अवधानं दीयते ।

६. छात्रेषु विषयाभिव्यक्तिसामर्थ्यम् विवर्धते ।

## प्रश्नपत्रस्य विन्यासे कृतं परिवर्तनम्
## विषयः – प्रथमभाषा संस्कृतम्

गरिष्ठाङ्काः : १२५ अवधिः – ३.१५ घण्टाः

**(Private Fresh)**

### १. उद्दिष्टानुगुणं प्रामुख्यम्

| 2018-19 | | | 2019-20 | | |
|---|---|---|---|---|---|
| **उद्दिष्टानि** | **प्रतिशतम्** | **प्रदत्ताङ्काः** | **उद्दिष्टानि** | **प्रतिशतम्** | **प्रदत्ताङ्काः** |
| स्मरणम् | 25 | 31 | स्मरणम् | 21 | 27 |
| धारणम् | 37 | 46 | धारणम् | 36 | 44 |
| अभिव्यक्तिः | 34 | 42 | अभिव्यक्तिः | 40 | 50 |
| प्रशंसा | 04 | 06 | प्रशंसा | 03 | 04 |
| **आहत्य** | **100** | **125** | **आहत्य** | **100** | **125** |

१. स्मरणात्मकप्रश्नानां 4% अङ्काः न्यूनीकृताः । 4%

२. धारणात्मकप्रश्नानामपि 1% अङ्कः न्यूनीकृतः ।

३. अभिव्यक्तौ 6% अधिकाः कृताः ।

४. प्रशंसायां 1% अङ्कः अल्पीकृतः ।

### २. विषयानुगुणं प्रामुख्यम्

| 2018-2019 | | | | 2019-2020 | | | |
|---|---|---|---|---|---|---|---|
| **विषयाः** | **प्रतिशतम्** | **प्रदत्ताङ्काः** | **प्रश्नसंख्या** | **विषयाः** | **प्रतिशतम्** | **प्रदत्ताङ्काः** | **प्रश्नसंख्या** |
| **गद्यम्** | 30 | 38 | 22 | **गद्यम्** | 28 | 36 | 19 |
| **पद्यम्** | 29 | 36 | 19 | **पद्यम्** | 31 | 39 | 18 |
| **पूरक – पाठाः** | 07 | 09 | 06 | **पूरक – पाठाः** | 08 | 10 | 05 |
| **अपठित–गद्यम्** | 04 | 04 | 01 | **अपठित–गद्यम्** | 03 | 04 | 01 |
| **व्याकरणम्** | 30 | 38 | 15 | **व्याकरणम्** | 30 | 36 | 16 |
| **आहत्य** | **100** | **125** | **63** | **आहत्य** | **100** | **125** | **59** |

१. गद्यभागे 2% अङ्काः न्यूनीकृताः ।

२. पद्यभागे 2%ः अङ्काः अधिकाः जाताः ।

३. पूरकपाठानाम् कृते 1% अधिकं दत्तम् ।

४. व्याकरणविभागे 1% न्यूनीकृतम् । आहत्य एकोनषष्टिः (59) प्रश्नाः भवन्ति ।

३. प्रश्नानुगुणं प्रामुख्यम्

| 2018-19 | | | | | 2019-20 | | | | |
|---|---|---|---|---|---|---|---|---|---|
| प्रश्नानां स्वरूपम् | प्रतिशतम् | प्रदत्ताः अङ्काः | प्रश्नानां संख्याः | अपेक्षितः समयः | प्रश्नानां स्वरूपम् | प्रतिशतम् | प्रदत्ताः अङ्काः | प्रश्नानां संख्याः | अपेक्षितः समयः |
| वस्तुनिष्ठः | 11 | 14 | 14 | 15 | वस्तुनिष्ठः | 12 | 15 | 15 | 20 |
| अतिलघूत्तरम् | 13 | 16 | 16 | 25 | अतिलघूत्तरम् | 06 | 08 | 08 | 10 |
| लघूत्तरम् | 24 | 30 | 15 | 40 | लघूत्तरम् | 24 | 30 | 15 | 45 |
| दीर्घोत्तरम्–१ | 21 | 27 | 09 | 40 | दीर्घोत्तरम्–१ | 34 | 42 | 14 | 55 |
| दीर्घोत्तरम्–२ | 23 | 28 | 07 | 40 | दीर्घोत्तरम्–२ | 16 | 20 | 05 | 30 |
| दीर्घोत्तरम्–३ | 08 | 10 | 02 | 20 | दीर्घोत्तरम्–३ | 08 | 10 | 02 | 20 |
| **आहत्य** | **100** | **125** | **63** | **180+15** | **आहत्य** | **100** | **125** | **59** | **180+15** |

१. वस्तुनिष्ठप्रश्नेषु एकः प्रश्नः अधिकः जातः ।

२. अतिलघूत्तरप्रश्नेषु अष्ट प्रश्नाः न्यूनाः जाताः ।

३. दीर्घोत्तरं –१ मध्ये पञ्चदश अङ्काः अधिकाः जाताः । पञ्चप्रश्नाः अधिकाः जाताः ।

४. दीर्घोत्तरं– २ मध्ये अष्ट अङ्काः न्यूनीकृताः । प्रश्नद्वयमपि अल्पीकृतम् ।

४. प्रश्नानां संख्यासु अपि परिवर्तनं जातम् । आहत्य चत्वारः प्रश्नाः न्यूनाः जाताः ।

४. प्रश्नस्तराः

| 2018-19 | | 2019-20 | |
|---|---|---|---|
| स्तराः | प्रतिशतम् | स्तराः | प्रतिशतम् |
| सुलभः | 30 | सुलभः | 30 |
| साधारणः | 50 | साधारणः | 50 |
| कठिनः | 20 | कठिनः | 20 |

१. अत्र किमपि परिवर्तनं न कृतम्

५. **प्रश्नप्रकाराः अङ्कवितरणञ्च**

| 2018-19 | | 2019-20 | |
|---|---|---|---|
| **प्रश्नप्रकाराः** | **अङ्कयोजनम्** | **प्रश्नप्रकाराः** | **अङ्कयोजनम्** |
| बहुविकल्पः | 10 x 1 = 10 | बहुविकल्पः | 10 x 1 = 10 |
| चतुर्थपदम् | 4 x 1 = 04 | चतुर्थपदम् | 5 x 1 = 05 |
| एकवाक्यम् | 16 x 1 = 16 | एकवाक्यम् | 8 x 1 = 08 |
| लघूत्तरम् –2-3 वाक्यानि | 15x 2 = 30 | लघूत्तरम् –2-3 वाक्यानि | 15x 2 = 30 |
| दीर्घोत्तरम् –१ 3-4/5-6 वाक्यानि | 9 x 3 = 27 | दीर्घोत्तरम् –१ 3-4/5-6 वाक्यानि | 14 x 3 = 42 |
| दीर्घोत्तरम् –२ 10 वाक्यानि | 7x 4 = 28 | दीर्घोत्तरम् –२ 10 वाक्यानि | 5x 4 = 20 |
| दीर्घोत्तरम् –३ 10 वाक्यानि | 2x 5 = 10 | दीर्घोत्तरम् –३ 10 वाक्यानि | 2x 5 = 10 |
| **आहत्य** | **63 / 125** | **आहत्य** | **59 / 125** |

१. चतुर्थपदे एकः प्रश्नः अधिकः जातः ।

२. एकवाक्ये अष्टौ प्रश्नाः न्यूनाः जाताः ।

३. दीर्घोत्तरम्–१ मध्ये पञ्च प्रश्नाः अधिकाः जाताः ।

४. दीर्घोत्तरम्–२ मध्ये द्वौ प्रश्नौ न्यूनौ जातौ ।

५. आहत्य प्रश्नाः एकोनषष्टिः (59) जाताः ।

**कर्नाटकप्रौढशिक्षण–परीक्षामण्डली**

**मार्गदर्शि प्रश्नपत्रम् – 1**

**2019-2020**

**विषयः – प्रथमभाषा संस्कृतम्** **विषयसङ्केतः – 16 S**

**(REGULAR FRESH)**

**समयः – 3 घण्टाः** **अङ्काः –100**

I. **अधोलिखितेभ्यः प्रश्नेभ्यः चत्वारः विकल्पाः प्रदत्ताः । तेषु समुचितं विकल्पं चित्वा क्रमाक्षरेण सह लिखत ।** **6 x 1 = 6**

1. वधः – अस्य समानार्थकपदम् इदं भवति ।
   a) कारणम् b) मारणम्
   c) तारणम् d) वारणम्
2. एषु शुद्धं वाक्यम् इदं भवति ।
   a) रामाय युद्धं रोचते । b) रामं युद्धं रोचते ।
   c) रामस्य युद्धं रोचते । d) रामात् युद्धं रोचते ।
3. पुत्रः – अस्य अन्यलिङ्गरूपम् इदं भवति ।
   a) पुत्रा b) पुत्रका
   c) पुत्री d) पुत्रिणी
4. यतिष्ये – अत्र एषः लकारः वर्तते ।
   a) लिट् लकारः b) लट् लकारः
   c) लङ् लकारः d) लृट् लकारः
5. सुमतिः – अस्य विरुद्धार्थकपदम् इदं भवति ।
   a) प्रमतिः b) विमतिः
   c) कुमतिः d) सम्मतिः
6. जलम् – अत्र एषा विभक्तिः वर्तते ।
   a) तृतीया b) चतुर्थी
   c) सप्तमी d) प्रथमा

**II. चतुर्थं पदं लिखत ।** **4 x 1 = 4**

7. दाडिमः – द्रुमः :: आमलकः – ______।
8. इदं जगत् – ईशावास्यम् :: कस्यस्विद्धनम् – _____।
9. बुद्धः – धीरप्रशान्तः :: वत्सराजः – _______।
10. रमणस्य माता _ अलगम्माल् :: रमणस्य पिता – ______।

**III. एकवाक्येन उत्तरं लिखत ।** **7x 1 = 7**

11. भूमिं परितः कः प्रदक्षिणं करोति ?
12. राजारामः कस्य पुत्रः ?
13. तृषितः चकोरः कम् आश्रयति ?
14. कः कर्णस्य सारथिः आसीत् ?
15. भारतीयभावना निरन्तरं किं ददाति ?
16. श्वेतपारावतौ दग्धुं कः इच्छति ?
17. गणपतिमुनिः किमर्थं रमणमहर्षेः समीपम् आगतः ?

**IV. द्वित्रैः वाक्यैः उत्तरं लिखत ।** **4 x2=8**

18. पादपजातयः काः ? तासां जन्म कथं भवति ?
19. सुमन्त्रप्रमुखाः दशरथाय किं व्यजिज्ञपन् ?
20. मानवः निर्वेदं कथम् आप्नोति ? ततः सः किं कुरुते ?
21. आदित्यस्य नमस्कारात् किं किं भवति ?

**V. निर्देशानुसारम् उत्तरं लिखत ।** **4 x2=8**

22. सन्धिं विभज्य नाम लिखत ।

    a) धेनुर्गच्छति । b) परोपकारः ।

23. विग्रहवाक्यं विलिख्य समासनाम लिखत ।

    a) प्रतिगृहम् b) दशरथपुत्रः

    अथवा

    समासं कृत्वा नाम लिखत ।

    a) अन्यः देशः = b) विषं कण्ठे यस्य सः =

24. वाक्ये विद्यमानं कृदन्तपदं चित्वा प्रत्ययस्य नाम लिखत :–

    a) छात्रः गणितं ज्ञातवान् ।

    b) बालकः गृहम् आगत्य पठति ।

25. प्रयोगपरिवर्तनं कुरुत ।

    a) तेन चित्रं दृश्यते ।

    b) अहं जलं पिबामि ।

**VI. संस्कृतभाषया अनुवादं कुरुत ।** **1 x2=2**

26. ಸಂಸ್ಕೃತಸಾಹಿತ್ಯದ ಪ್ರಸಿದ್ಧ ಕವಿಗಳಲ್ಲಿ ಭಾರವಿಯೂ ಒಬ್ಬನು. ಅವನು 'ಕಿರಾತಾರ್ಜುನೀಯಮ್' ಎಂಬ ಮಹಾಕಾವ್ಯವನ್ನು ಬರೆದಿದ್ದಾನೆ.

**VII. कर्नाटकभाषया आङ्ग्लभाषया वा अनुवादं कुरुत ।** **1 x2=2**

27. आधुनिके युगे धनवान् सर्वत्र पूज्यते । जनाः विद्यावतः अपेक्षया धनवन्तं आदरेण पश्यन्ति ।

**VIII. यथानिर्देशम् उत्तरं त्रिचतुरैः वाक्यैः लिखत ।** **4 x3=12**

28. किं भवेत् ? मम समीपे ।

    कः पाठः ? कः अवदत् ? कम् अवदत् ?

29. भवतु अस्माकं महाराज्ञी अभयदायिनी ।

    कः पाठः ? के अवदन् ? महाराज्ञी का ?

अथवा

शरणागतरक्षणं धर्मः इति अस्माकं श्रद्धा ।

कः पाठः ? का अवदत् ? शरणागतः कः ?

30. सागरः इव तिष्ठतु ते यशः ।

    कः पाठः ? कः अवदत् ? कस्य यशः ?

31. जग्राह सहसा रविम् ।

    कः पाठः ? कः अवदत् ? कम् अवदत् ?

**IX. कवेः देश–काल–कृतीनां विषये त्रिचतुरैः वाक्यैः लिखत ।** **2 x3=6**

32. बल्लालसेनः ।

33. वाल्मीकिः ।

**X. पद्यपाठस्य नाम उल्लिख्य तात्पर्यं पञ्चषैः वाक्यैः कर्नाटकभाषया संस्कृतभाषया आङ्ग्लभाषया वा लिखत ।** **3 x 3=9**

34. ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत् ।
    तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्यस्विद्धनम् ॥

35. चित्तशान्तिदायिनी विरक्तिबुद्धिवर्धिनी
    भेदभावनाशिनी जनेषु चैक्यकारिणी ।
    दुःखशोकहारिणी भवाम्बुधेश्च तारिणी
    भारतीयभावना विवृद्धिमेतु भारते ॥

36. शृङ्गारहास्यकरुणाः रौद्रवीरभयानकाः ।
    बीभत्साद्भुतशान्ताश्च नव नाट्ये रसाः स्मृताः ॥

अथवा

नायिकाश्चैव वक्ष्यामि चतस्रः पुनरेव तु ।
दिव्या च नृपपत्नी च कुलस्त्री गणिका तथा ।

**XI. वाक्ये विद्यमानं अलङ्कारं सलक्षणं समन्वयत ।** **1 x3=3**

37. ज्ञानामृतं पीत्वा तुष्टः ।

अथवा

गङ्गा गङ्गेव पावनी ।

**XII. प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दोनाम लिखत ।** **1 x3=3**

38. देयं तथापि कवचं सह कुण्डलाभ्याम् ।

**XIII. पद्यं पूरयत ।** **1 x4=4**

39. सुखस्य -------------

------------------

------------------

------------- लोकः ॥

**XIV. दशवाक्यैः उत्तरं कर्नाटकभाषया संस्कृतभाषया आङ्ग्लभाषया वा लिखत ।** **3 x4=12**

40. संस्कृतसाहित्ये ज्ञानपीठप्रशस्तिपुरस्कृतस्य सत्यव्रतशास्त्रिमहोदयस्य बाल्यजीवनं विवृणुत ।

41. 'भीष्मोक्तयः' पद्यपाठस्य सारांशं सङ्गृह्य लिखत ।

42. ध्रुवकथां सङ्गृह्य लिखत ।

अथवा

आरोग्यनियमान् सङ्गृह्य लिखत ।

**XV. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत ।** **1 x 4 = 4**

43. जगति सत्यस्य महत्स्थानम् वर्तते । सत्येनैव समाजस्य स्थितिः भवति । सत्यभाषणेन मानवः निर्भीकः भवति । यः सत्यम् आश्रयति तस्य जीवनं सफलं भवति । असत्यभाषणेन समाजस्य नाशः भवति । अत एव 'सत्यात् परः धर्मः नास्ति' इति उक्तम् । राजा हरिश्चन्द्रः सत्यपालनार्थमेव सर्वाणि दुःखानि असहत । धर्मराजः सत्यादेव विजयम् अलभत । भारतस्य राजचिह्नेऽपि "सत्यमेव जयते" इति उल्लिखितम्।

प्रश्नाः

१. मानवः केन निर्भीकः भवति ?

२. कस्य जीवनं सफलं भवति ?

३. भारतस्य राजचिह्ने किमिति उल्लिखितम् ?

४. कः सत्यादेव विजयम् अलभत ?

**XVI पत्रं लिखत ।** **1 x 5 =5**

44. धारवाडनगरस्य सर्वकारीयविद्यालयस्य छात्रः / छात्रा इति भावयित्वा अग्रजस्य विवाहार्थं दिनत्रयं विरामं सम्प्रार्थ्य मुख्योपाध्यायं प्रति विरामपत्रं लिखत ।

अथवा

'सुभाषितत्रिशती' इति पुस्तकं प्रेषयितुं निवेद्य देहलीनगरस्य गीताप्रकाशनस्य व्यवस्थापकं प्रति आवेदनपत्रं लिखत ।

**XVII. दशवाक्यैः प्रबन्धं लिखत ।** **1 x 5 =5**

45. भारतीयविज्ञानम् अथवा समाचारपत्रम्

***************

# कर्नाटकप्रौढशिक्षण–परीक्षामण्डली
## मार्गदर्शि प्रश्नपत्रम् – 2
## 2019-2020
## (Regular Fresh)

**विषयः – प्रथमभाषा संस्कृतम्** **विषयसङ्केतः – 16 S**

**समयः – 3 घण्टाः** **अङ्काः – 100**

**I. अधोलिखितेभ्यः प्रश्नेभ्यः चत्वारः विकल्पाः प्रदत्ताः । तेषु समुचितं विकल्पं चित्वा क्रमाक्षरेण सह लिखत ।** **6 x 1 = 6**

1. वृद्धिः – अस्य विरुद्धार्थकपदम् इदं भवति ।
   a) वयः b) क्षयः
   c) जयः d) पयः
2. एषु शुद्धं वाक्यम् इदं भवति ।
   a) बालकाय मोदकं रोचते । b) बालकं मोदकं रोचते ।
   c) बाले मोदकं रोचते । d) बालकात् मोदकं रोचते ।
3. मुकुटम् – अस्य समानार्थकपदम् इदं भवति ।
   a) पर्वतः b) देहः
   c) किरीटम् d) पादः
4. गुरुणा – अत्र एषा विभक्तिः वर्तते ।
   a) चतुर्थी b) पञ्चमी
   c) प्रथमा d) तृतीया
5. अलिखत् – अत्र एषः लकारः वर्तते ।
   a) लङ् लकारः b) लट् लकारः
   c) लोट् लकारः d) लिट् लकारः
6. जननी – अस्य अन्यलिङ्गरूपम् इदं भवति ।
   a) भगिनी b) माता
   c) स्वसा d) जनकः

**II. चतुर्थं पदं लिखत ।** **4 x 1 = 4**

7. ज्ञानपीठप्रशस्तिः – सर्वश्रेष्ठप्रशस्तिः :: सिल्पकोर्न – ______।
8. अर्जुनः – धीरोदात्तः :: श्रीकृष्णः – _____।
9. भूपालः – उत्तानपादः :: सर्वलोकशरण्यः – _______।
10. प्रसन्नात्मेन्द्रियमनाः – स्वस्थः :: क्रियाः सर्वाः – ______।

**III. एकवाक्येन उत्तरं लिखत ।** **7x 1 = 7**

11. सत्यव्रतशास्त्रिमहोदयः कुत्र अजायत ?
12. लोके सदा किं शाम्यतु ?
13. वत्सराजः कदा भोजकुमारं गुरुकुलात् आनाययत् ?
14. पङ्क्तिरथः कः ?
15. चित्तशान्तिदायिनी का ?
16. दिनेश्वरः किमर्थं बालं मारुतिः न ददाह ?
17. नगाधिराजः कः ?

**IV. द्वित्रैः वाक्यैः उत्तरं लिखत ।** **4 x2=8**

18. संस्कृतभाषाविषये डा. सत्यव्रतशास्त्रिमहोदयस्य आशयः कः ?
19. सुमन्त्रप्रमुखाः दशरथाय किं व्यजिज्ञपन् ?
20. सन्तुष्टः भगवान् विष्णुः ध्रुवं किम् अवदत् ?
21. सतां सङ्गः किं किं करोति ?

अथवा

रेखाङ्कितपदम् अवलम्ब्य प्रश्ननिर्माणं कुरुत ।

a) <u>वृत्रासुरः</u> जनान् पीडयति स्म् ।

b) सतां सङ्गः <u>कुमतिं</u> दूरीकरोति ।

**V. निर्देशानुसारम् उत्तरं लिखत ।** **4 x2=8**

22. सन्धिं विभज्य नाम लिखत ।

a) मुनिरवदत् ।　　b) अस्मन्मित्रम् ।

23. विग्रहवाक्यं विलिख्य समासनाम लिखत ।

a) यथाक्रमम्　　b) दीर्घायुः

24. वाक्ये विद्यमानं कृदन्तपदं चित्वा प्रत्ययस्य नाम लिखत :-

a) पठते बालकाय लेखनीं यच्छतु ।

b) पुष्पेण विकसितव्यम् ।

25. प्रयोगपरिवर्तनं कुरुत ।

a) लता मां पश्यति ।

b) पित्रा कार्यालयः गम्यते ।

**VI. संस्कृतभाषया अनुवादं कुरुत ।** **1 x2=2**

26. ಮಹಾಭಾರತವು ಸಂಸ್ಕೃತಸಾಹಿತ್ಯದಲ್ಲಿ ಪ್ರಸಿದ್ಧವಾದ ಗ್ರಂಥವಾಗಿದೆ. ಇದು ಅನೇಕ ಕವಿಗಳಿಗೆ ಆಕರಗ್ರಂಥವಾಗಿದೆ.

**VII. कर्नाटकभाषया आङ्ग्लभाषया वा अनुवादं कुरुत ।** **1 x2=2**

27. पुरा भोजराजस्य आस्थाने बहवः कवयः आसन् । तेषु कालिदासः अपि अन्यतमः ।

**VIII. यथानिर्देशम् उत्तरं त्रिचतुरैः वाक्यैः लिखत ।** **4 x3=12**

28. 'लीलावती' इति ग्रन्थे बहवः विषयाः निरूपिताः सन्ति ।

कः पाठः ? का वदति ? कस्य ग्रन्थः एषः ?

29. सहसा वह्निमाविश ।

कः पाठः ? के ऊचुः ? कम् ऊचुः ?

30. भगवन्, किमिच्छसि ? किमहं ददानि ?

कः पाठः ? कः अवदत् ? कम् अवदत् ?

31. किंस्वित् श्रेष्ठतरं भवेत् ?

कः पाठः ? कः अवदत् ? कम् अवदत् ?

अथवा

रसे गन्धे न रज्यते ।

कः पाठः ? कः अवदत् ? कः न रज्यते ?

**IX. कवेः देश–काल–कृतीनां विषये त्रिचतुरैः वाक्यैः लिखत ।** **2 x3=6**

32. वेदव्यासः ।

33. विद्वान् एच्. वि. नागराजराव् ।

**X. पद्यपाठस्य नाम उल्लिख्य तात्पर्यं पञ्चषैः वाक्यैः कर्नाटकभाषया संस्कृतभाषया आङ्ग्लभाषया वा लिखत ।** **3 x 3=9**

34. यस्तु सर्वाणि भूतानि आत्मनेवानुपश्यति ।
सर्वभूतेषु चात्मानं ततो न विजुगुप्सते ॥

35. आत्मशक्तिवर्धिता विशालदृष्टिसंयुता
द्वेषभाववर्जिता निरन्तरं सुखप्रदा ।
राष्ट्रसत्त्वधारिणी तमः प्रखण्डखण्डिनी
भारतीयभावना विवृद्धिमेतु भारते ॥

36. शारीरा वैणवाश्चैव सप्तषड्जादयः स्वराः ।
निषादर्षभगान्धारमध्यपञ्चमधैवताः ॥

अथवा

ततं तन्त्रीगतं ज्ञेयम् अवनद्धम् तु पौष्करम् ।
घनस्तु तालो विज्ञेयः सुषिरो वंश एव च ॥

**XI. वाक्ये विद्यमानं अलङ्कारं सलक्षणं समन्वयत ।** **1 x3=3**

37. माघे मेघे गतं वयः ।

अथवा

मधुरं मधु पीयूषं तस्मात्तस्मात् कवेर्वचः ।

**XII. प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दोनाम लिखत ।** **1 x3=3**

38. प्रचलति यदि मेरुः शीततां याति वह्निः ।

**XIII. पद्यं पूरयत ।** **1 x4=4**

39. मनीषिणः -------------

-----------------

-----------------

-------------च दुर्लभम् ॥

**XIV. दशवाक्यैः उत्तरं कर्नाटकभाषया संस्कृतभाषया आङ्ग्लभाषया वा लिखत ।** **3 x4=12**

40. वृत्रवधोपायं ज्ञातुम् आगतान् देवान् ब्रह्मदेवः किम् अवदत् ?

41. हनूमतः जननवृत्तान्तं पद्यानुगुणं लिखत ।

42. भगवान् रमणमहर्षिः महर्षित्वं स्वजीवनेन दर्शितवान् – विवृणुत ।

अथवा

अमरनाथगुहाविषये का पुराणकथा अस्ति ?

**XV. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत ।** **1 x 4 = 4**

43. कुरुक्षेत्रे कर्णार्जुनयोः भीषणं युद्धं प्रवृत्तम् । उभयोः वीरतां दृष्ट्वा सर्वे आश्चर्यचकिताः । युद्धकाले अर्जुनस्य बाणप्रहारेण कर्णस्य रथः एकं योजनं प्रतिसरति स्म । किन्तु कर्णस्य बाणप्रहारेण अर्जुनस्य रथः किञ्चिन्मात्रं प्रतिसरति स्म । युद्धसमये अर्जुनस्य सारथिः कृष्णः आसीत् । कृष्णः एतत् सर्वं दृष्ट्वा वारं वारं "साधु कर्ण साधु" इति कर्णं साधुवादैः अभिनन्दति स्म । इदं श्रुत्वा कुपितह् अर्जुनः कृष्णम् अपृच्छत् । " हे मधुसूदन ! मम बाणप्रहारेण कर्णस्य रथः योजनपरिमितं दूरं गच्छति तथापि मह्यं साधुवादं न वदति । भवान् किमर्थम् एवं वदति इति अपृच्छत् ।

प्रश्नाः

१. कयोः मध्ये भीषणं युद्धं प्रावर्तत ?

२. कर्णस्य रथः कियत् दूरं प्रतिसरति स्म ?

३. अर्जुनस्य सारथिः कः ?

४. कृष्णः कर्णं कैः अभिनन्दति स्म ?

**XVI पत्रं लिखत ।** **1 x 5 =5**

44. भवतः गृहस्य देवकार्ये भागं गृहीतुं दिनद्वयस्य विरामं प्रार्थ्य कक्ष्याधयापकं प्रति पत्रं लिखत ।

अथवा

शालाप्रवासस्य वर्णनं कृत्वा अग्रजं प्रति पत्रं लिखत ।

**XVII. दशवाक्यैः प्रबन्धं लिखत ।** **1 x 5 =5**

45. दूरदर्शनम् अथवा स्वातन्त्र्योत्सवः

***************

# कर्नाटकप्रौढशिक्षण–परीक्षामण्डली
## मार्गदर्शि प्रश्नपत्रम् – 1
## 2019-2020
## (Private Fresh)

**विषयः – प्रथमभाषा संस्कृतम्** | **विषयसङ्केतः – 16 S**

**समयः – 3.15 घण्टाः** | **अङ्काः – 125**

**I. अधोलिखितेभ्यः प्रश्नेभ्यः चत्वारः विकल्पाः प्रदत्ताः। तेषु समुचितं विकल्पं चित्वा क्रमाक्षरेण सह लिखत।** **10 x 1 = 10**

1. वधः – अस्य समानार्थकपदम् इदं भवति।
   a) कारणम् b) मारणम्
   c) तारणम् d) वारणम्
2. एषु शुद्धं वाक्यम् इदं भवति।
   a) रामाय युद्धं रोचते। b) रामं युद्धं रोचते।
   c) रामस्य युद्धं रोचते। d) रामात् युद्धं रोचते।
3. पुत्रः – अस्य अन्यलिङ्गरूपम् इदं भवति।
   a) पुत्रा b) पुत्रका
   c) पुत्री d) पुत्रिणी
4. यतिष्ये – अत्र एषः लकारः वर्तते।
   a) लिट् लकारः b) लट् लकारः
   c) लङ् लकारः d) लृट् लकारः
5. सुमतिः – अस्य विरुद्धार्थकपदम् इदं भवति।
   a) प्रमतिः b) विमतिः
   c) कुमतिः d) सम्मतिः
6. जलम् – अत्र एषा विभक्तिः वर्तते।
   a) तृतीया b) चतुर्थी
   c) सप्तमी d) प्रथमा
7. तैरपि – अत्र एषः सन्धिः वर्तते।
   a) जश्त्वसन्धिः b) वृद्धिसन्धिः
   c) विसर्गसन्धिः d) श्चुत्वसन्धिः
8. पूर्वपदार्थप्रधानः एषः समासः भवति।
   a) बहुव्रीहिः b) द्वन्द्वः
   c) तत्पुरुषः d) अव्ययीभावः

9. रामः पठितुं शालां गच्छति । अत्र कृदन्तपदम् इदं भवति ।

a) रामः b) पठितुम्

c) शालाम् d) गच्छति

10. कर्मणि प्रयोगे कर्मपदस्य विभक्तिः एषा भवति ।

a) प्रथमा b) तृतीया

c) द्वितीया d) चतुर्थी

**II. चतुर्थं पदं लिखत ।** **5 x 1 = 5**

11. दाडिमः – द्रुमः :: आमलकः – ______।

12. इदं जगत् – ईशावास्यम् :: कस्यस्विद्धनम् – _____।

13. बुद्धः – धीरप्रशान्तः :: वत्सराजः – _______।

14. रमणस्य माता – अलगम्माल् :: रमणस्य पिता – ______।

15. ध्रुवः – सुनीतेः पुत्रः :: उत्तमः – ______।

**III. एकवाक्येन उत्तरं लिखत ।** **8x 1 = 8**

16. भूमिं परितः कः प्रदक्षिणं करोति ?

17. राजारामः कस्य पुत्रः ?

18. तृषितः चकोरः कम् आश्रयति ?

19. कः कर्णस्य सारथिः आसीत् ?

20. भारतीयभावना निरन्तरं किं ददाति ?

21. श्वेतपारावतौ दग्धुं कः इच्छति ?

22. गणपतिमुनिः किमर्थं रमणमहर्षेः समीपम् आगतः ?

23. मोक्षप्राप्तिः केन भवति ?

**IV. द्वित्रैः वाक्यैः उत्तरं लिखत ।** **7 x2=14**

24. पादपजातयः काः ? तासां जन्म कथं भवति ?

25. सुमन्त्रप्रमुखाः दशरथाय किं व्यजिज्ञपन् ?

26. रेखाङ्कितपदम् अवलम्ब्य प्रश्ननिर्माणं कुरुत ।

a) वेदव्यासः <u>पराशरस्य</u> पुत्रः ।

b) वृक्षः <u>काले</u> फलानि यच्छन्ति ।

27. मानवः निर्वेदं कथम् आप्नोति ? ततः सः किं कुरुते ?

28. आदित्यस्य नमस्कारात् किं किं भवति ?

अथवा

कैः षड्भिः निदानैः रोगाः सम्भवन्ति ?

29. संस्कृतभाषाविषये डा॥ सत्यव्रतशास्त्रिमहोदयस्य आशयः कः ?

30. कविः कीदृशीं मातरं नमामि इति वदति ?

**V. निर्देशानुसारम् उत्तरं लिखत ।** **6 x2=12**

31. सन्धिं विभज्य नाम लिखत ।

a) धेनुर्गच्छति । b) परोपकारः ।

32. विग्रहवाक्यं विलिख्य समासनाम लिखत ।

a) प्रतिगृहम् b) दशरथपुत्रः

अथवा

समासं कृत्वा नाम लिखत ।

a) अन्यः देशः = b) विषं कण्ठे यस्य सः =

33. वाक्ये विद्यमानं कृदन्तपदं चित्वा प्रत्ययस्य नाम लिखत :–

a) छात्रः गणितं ज्ञातवान् ।

b) बालकः गृहम् आगत्य पठति ।

34. प्रयोगपरिवर्तनं कुरुत ।

a) तेन चित्रं दृश्यते ।

b) अहं जलं पिबामि ।

35. लकार–पुरुष–वचनानि लिखत ।

a) वदति । b) अगच्छत् ।

36. वाक्यदोषं परिहरत ।

a) नगरस्य बहिः उपवनं भवति ।

b) बालकः चोरेण बिभेति ।

**VI. संस्कृतभाषया अनुवादं कुरुत ।** **1 x2=2**

37. ಸಂಸ್ಕೃತಸಾಹಿತ್ಯದ ಪ್ರಸಿದ್ಧ ಕವಿಗಳಲ್ಲಿ ಭಾರವಿಯೂ ಒಬ್ಬನು. ಅವನು 'ಕಿರಾತಾರ್ಜುನೀಯಮ್' ಎಂಬ ಮಹಾಕಾವ್ಯವನ್ನು ಬರೆದಿದ್ದಾನೆ.

**VII. कर्नाटकभाषया आङ्ग्लभाषया वा अनुवादं कुरुत ।** **1 x2=2**

38. आधुनिके युगे धनवान् सर्वत्र पूज्यते । जनाः विद्यावतः अपेक्षया धनवन्तं आदरेण पश्यन्ति ।

**VIII. यथानिर्देशम् उत्तरं त्रिचतुरैः वाक्यैः लिखत ।** **5 x3=15**

39. किं भवेत् ? मम समीपे ।

कः पाठः ? कः अवदत् ? कम् अवदत् ?

40. भवतु अस्माकं महाराज्ञी अभयदायिनी ।

कः पाठः ? के अवदन् ? महाराज्ञी का ?

अथवा

शरणागररक्षणं धर्मः इति अस्माकं श्रद्धा ।

कः पाठः ? का अवदत् ? शरणागतः कः?

41. सागरः इव तिष्ठतु ते यशः ।

कः पाठः ? कः अवदत् ? कस्य यशः ?

42. जग्राह सहसा रविम् ।

कः पाठः ? कः अवदत् ? कम् अवदत् ?

43. मया भोजः रक्षितः ।

कः पाठः ? कः अवदत् ? कम अवदत् ?

**IX. कवेः देश–काल–कृतीनां विषये त्रिचतुरैः वाक्यैः लिखत ।** **3 x3=9**

44. बल्लालसेनः ।

45. वाल्मीकिः ।

46. कालिदासः

अथवा

भरतमुनिः ।

**X. पद्यपाठस्य नाम उल्लिख्य तात्पर्यं पञ्चषैः वाक्यैः कर्नाटकभाषया संस्कृतभाषया आङ्ग्लभाषया वा लिखत ।** **3 x 4=12**

47. ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत् ।
तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्यस्विद्धनम् ॥

48. चित्तशान्तिदायिनी विरक्तिबुद्धिवर्धिनी
भेदभावनाशिनी जनेषु चैक्यकारिणी ।
दुःखशोकहारिणी भवाम्बुधेश्च तारिणी
भारतीयभावना विवृद्धिमेतु भारते ॥

49. शृङ्गारहास्यकरुणाः रौद्रवीरभयानकाः ।
बीभत्साद्भुतशान्ताश्च नव नाट्ये रसाः स्मृताः ॥

अथवा

नायिकाश्चैव वक्ष्यामि चतस्रः पुनरेव तु ।
दिव्या च नृपपत्नी च कुलस्त्री गणिका तथा ।

50. अहमस्य प्रदास्यामि परमं वरमद्भुतम् ।
इतः प्रभृति वज्रस्य ममावध्यो भविष्यति ॥

**XI. वाक्ये विद्यमानं अलङ्कारं सलक्षणं समन्वयत ।** **1 x3=3**

51. ज्ञानामृतं पीत्वा तुष्टः ।

अथवा

गङ्गा गङ्गेव पावनी ।

**XII. प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दोनाम लिखत ।** **1 x3=3**

52. देयं तथापि कवचं सह कुण्डलाभ्यां ।

**XIII. पद्यं पूरयत ।** **1 x4=4**

53. सुखस्य -------------

-------------------

------------------

------------- लोकः ॥

**XIV. दशवाक्यैः उत्तरं कर्नाटकभाषया संस्कृतभाषया आङ्ग्लभाषया वा लिखत ।** **3 x4=12**

54. संस्कृतसाहित्ये ज्ञानपीठप्रशस्तिपुरस्कृतस्य सत्यव्रतशास्त्रिमहोदयस्य बाल्यजीवनं विवृणुत ।

55. 'भीष्मोक्तयः' पद्यपाठस्य सारांशं सङ्गृह्य लिखत ।

56. ध्रुवकथां सङ्गृह्य लिखत ।

अथवा

आरोग्यनियमान् सङ्गृह्य लिखत ।

**XV. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत ।** **1 x 4 = 4**

57. जगति सत्यस्य महत्स्थानम् वर्तते । सत्येनैव समाजस्य स्थितिः भवति । सत्यभाषणेन मानवः निर्भीकः भवति । यः सत्यम् आश्रयति तस्य जीवनं सफलं भवति । असत्यभाषणेन समाजस्य नाशः भवति । अत एव 'सत्यात् परः धर्मः नास्ति' इति उक्तम् । राजा हरिश्चन्द्रः सत्यपालनार्थमेव सर्वाणि दुःखानि असहत । धर्मराजः सत्यादेव विजयम् अलभत । भारतस्य राजचिह्नेऽपि "सत्यमेव जयते" इति उल्लिखितम्।

प्रश्नाः

१. मानवः केन निर्भीकः भवति ?

२. कस्य जीवनं सफलं भवति ?

३. भारतस्य राजचिह्ने किमिति उल्लिखितम् ?

४. कः सत्यादेव विजयम् अलभत ?

**XVI पत्रं लिखत ।** **1 x 5 =5**

58. धारवाडनगरस्य सर्वकारीयविद्यालयस्य छात्रः / छात्रा इति भावयित्वा अग्रजस्य विवाहार्थं दिनत्रयं विरामं सम्प्रार्थ्य मुख्योपाध्यायं प्रति विरामपत्रं लिखत ।

अथवा

'सुभाषितत्रिशती' इति पुस्तकं प्रेषयितुं निवेद्य देहलीनगरस्य गीताप्रकाशनस्य व्यवस्थापकं प्रति आवेदनपत्रं लिखत ।

**XVII. दशवाक्यैः प्रबन्धं लिखत ।** **1 x 5 =5**

59. भारतीयविज्ञानम् अथवा समाचारपत्रम्

***************

# कर्नाटकप्रौढशिक्षण–परीक्षामण्डली

## मार्गदर्शि प्रश्नपत्रम् – 2

## 2019-2020

## (Private Fresh)

**विषयः – प्रथमभाषा संस्कृतम्** **विषयसङ्केतः – 16 S**

**समयः – 3.15 घण्टाः** **अङ्काः – 125**

**I. अधोलिखितेभ्यः प्रश्नेभ्यः चत्वारः विकल्पाः प्रदत्ताः । तेषु समुचितं विकल्पं चित्वा क्रमाक्षरेण सह लिखत ।** **10 x 1 = 10**

1. वृद्धिः – अस्य विरुद्धार्थकपदम् इदं भवति ।
   a) वयः b) क्षयः
   c) जयः d) पयः

2. एषु शुद्धं वाक्यम् इदं भवति ।
   a) बालकाय मोदकं रोचते । b) बालकं मोदकं रोचते ।
   c) बाले मोदकं रोचते । d) बालकात् मोदकं रोचते ।

3. मुकुटम् – अस्य समानार्थकपदम् इदं भवति ।
   a) पर्वतः b) देहः
   c) किरीटम् d) पादः

4. गुरुणा – अत्र एषा विभक्तिः वर्तते ।
   a) चतुर्थी b) पञ्चमी
   c) प्रथमा d) तृतीया

5. अलिखत् – अत्र एषः लकारः वर्तते ।
   a) लङ् लकारः b) लट् लकारः
   c) लोट् लकारः d) लिट् लकारः

6. जननी – अस्य अन्यलिङ्गरूपम् इदं भवति ।
   a) भगिनी b) माता
   c) स्वसा d) जनकः

7. मुनिरिति – अत्र सन्धिविभजनम् एवं भवति ।
   a) मुनिः + एति b) मुनिः + अति
   c) मुनिः + इति d) मुनिः + ति

8. उभयपदार्थप्रधानः एषः समासः भवति ।
   a) द्वन्द्वः b) द्विगुः
   c) बहुव्रीहिः d) कर्मधारयः

9. भूतकालार्थे एषः प्रत्ययः वर्तते ।

a) तव्यत्  b) शानच्

c) शतृ  d) क्तवतु

10. भावे प्रयोगे कर्तृपदस्य विभक्तिः एषा भवति ।

a) द्वितीया  b) तृतीया

c) प्रथमा  d) चतुर्थी

**II. चतुर्थं पदं लिखत ।** **5 x 1 = 5**

| | | | |
|---|---|---|---|
| 11. ज्ञानपीठप्रशस्तिः – सर्वश्रेष्ठप्रशस्तिः | :: | सिल्पकोर्न – | ______। |
| 12. अर्जुनः – धीरोदात्तः | :: | श्रीकृष्णः – | ______। |
| 13. भूपालः – उत्तानपादः | :: | सर्वलोकशरण्यः – | ______। |
| 14. प्रसन्नात्मेन्द्रियमनाः _ स्वस्थः | :: | क्रियाः सर्वाः – | ______। |
| 15. गणपतिः _ मुनिः | :: | रमणः – | ______। |

**III. एकवाक्येन उत्तरं लिखत ।** **8x 1 = 8**

16. सत्यव्रतशास्त्रिमहोदयः कुत्र अजायत ?

17. लोके सदा किं शाम्यतु ?

18. वत्सराजः कदा भोजकुमारं गुरुकुलात् आनाययत् ?

19. पङ्क्तिरथः कः ?

20. चित्तशान्तिदायिनी का?

21. दिनेश्वरः किमर्थं बालं मारुतिं न ददाह ?

22. नगाधिराजः कः ?

23. नाट्यशास्त्रस्य रचयिता कः ?

**IV. द्वित्रैः वाक्यैः उत्तरं लिखत ।** **7 x2=14**

24. संस्कृतभाषाविषये डा. सत्यव्रतशास्त्रिमहोदयस्य आशयः कः ?

25. सुमन्त्रप्रमुखाः दशरथाय किं व्यजिज्ञपन् ?

26. सन्तुष्टः भगवान् विष्णुः ध्रुवं किम् अवदत् ?

27. सतां सङ्गः किं किं करोति ?

28. रेखाङ्कितपदम् अवलम्ब्य प्रश्ननिर्माणं कुरुत ।

a) <u>वृत्रासुरः</u> जनान् पीडयति स्म् ।

b) सतां सङ्गः <u>कुमतिं</u> दूरीकरोति ।

29. जामदग्न्यः किमर्थं कर्णं शशाप ?

अथवा

कर्णः शक्राय किं किं ददाति ? तयोः वैशिष्ट्यं किम् ?

30. शैलश्रृङ्गवासिनी का ? सा कैः पूजिता ?

**V. निर्देशानुसारम् उत्तरं लिखत ।** **6 x2=12**

31. सन्धिं विभज्य नाम लिखत ।

a) मुनिरवदत् । b) अस्मन्मित्रम् ।

32. विग्रहवाक्यं विलिख्य समासनाम लिखत ।

a) यथाक्रमम् b) दीर्घायुः

अथवा

समासं कृत्वा नाम लिखत ।

a) कपिः शार्दूलः इव = b) मम शिरः =

33. वाक्ये विद्यमानं कृदन्तपदं चित्वा प्रत्ययस्य नाम लिखत :–

a) पठते बालकाय लेखनीं यच्छतु ।

b) पुष्पेण विकसितव्यम् ।

34. प्रयोगपरिवर्तनं कुरुत ।

a) लता मां पश्यति ।

b) पित्रा कार्यालयं गम्यते ।

35. लकार–पुरुष–वचनानि लिखत ।

a) प्रावर्तत । b) यतिष्ये ।

36. वाक्यदोषं परिहरत ।

a) धर्मेण इष्टम् गतिं प्रपद्यते ।

b) भवन्तः सर्वे अत्र आगच्छत ।

**VI. संस्कृतभाषया अनुवादं कुरुत ।** **1 x2=2**

37. ಮಹಾಭಾರತವು ಸಂಸ್ಕೃತಸಾಹಿತ್ಯದಲ್ಲಿ ಪ್ರಸಿದ್ಧವಾದ ಗ್ರಂಥವಾಗಿದೆ. ಇದು ಅನೇಕ ಕವಿಗಳಿಗೆ ಆಕರಗ್ರಂಥವಾಗಿದೆ.

**VII. कर्नाटकभाषया आङ्ग्लभाषया वा अनुवादं कुरुत ।** **1 x2=2**

38. पुरा भोजराजस्य आस्थाने बहवः कवयः आसन् । तेषु कालिदासः अपि अन्यतमः ।

**VIII. यथानिर्देशम् उत्तरं त्रिचतुरैः वाक्यैः लिखत ।** **5 x3=15**

39. 'लीलावती' इति ग्रन्थे बहवः विषयाः निरूपिताः सन्ति ।

कः पाठः ? का वदति ? कस्य ग्रन्थः एषः ?

40. सहसा वह्निमाविश ।

कः पाठः ? के ऊचुः ? कम् ऊचुः ?

41. भगवन्, किमिच्छसि ? किमहं ददानि ?

कः पाठः ? कः अवदत् ? कम् अवदत् ?

42. किंस्वित् श्रेष्ठतरं भवेत् ?

कः पाठः ? कः अवदत् ? कम् अवदत् ?

अथवा

रसे गन्धे न रज्यते ।

कः पाठः ? कः अवदत् ? कः न रज्यते ?

43. भवानेव संस्कृतेन गन्थान् लिखतु ।

कः पाठः ? कः अवदत् ? कम अवदत् ?

**IX. कवेः देश–काल–कृतीनां विषये त्रिचतुरैः वाक्यैः लिखत ।** **3 x3=9**

44. वेदव्यासः ।

45. विद्वान् एच्. वि. नागराजराव् ।

46. भोजराजः अथवा के.एस्. नागराजन् ।

**X. पद्यपाठस्य नाम उल्लिख्य तात्पर्यं पञ्चषैः वाक्यैः कर्नाटकभाषया संस्कृतभाषया आङ्ग्लभाषया वा लिखत ।** **3 x 4=12**

47. यस्तु सर्वाणि भूतानि आत्मनेवानुपश्यति ।
सर्वभूतेषु चात्मानं ततो न विजुगुप्सते ॥

48. आत्मशक्तिवर्धिता विशालदृष्टिसंयुता
द्वेषभाववर्जिता निरन्तरं सुखप्रदा ।
राष्ट्रसत्वधारिणी तमः प्रखण्डखण्डिनी
भारतीयभावना विवृद्धिमेतु भारते ॥

49. शारीरा वैणवाश्चैव सप्तषड्जादयः स्वराः ।
निषादर्षभगान्धारमध्यपञ्चमधैवताः ॥

अथवा

ततं तन्त्रीगतं ज्ञेयम् अवनद्धम् तु पौष्करम् ।
घनस्तु तालो विज्ञेयः सुषिरो वंश एव च ॥

50. अद्याहं पर्वकाले तु जिघृक्षुः सूर्यमागतः ।
अथान्यो राहुरासाद्य जग्राह सहसा रविम् ॥

**XI. वाक्ये विद्यमानं अलङ्कारं सलक्षणं समन्वयत ।** **1 x3=3**

51. माघे मेघे गतं वयः ।

अथवा

मधुरं मधु पीयूषं तस्मात्तस्मात् कवेर्वचः ।

**XII. प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दोनाम लिखत ।** **1 x3=3**

52. मातेव रक्षति पितेव हिते नियुङ्क्ते ।

**XIII. पद्यं पूरयत ।** **1 x4=4**

53. मनीषिणः -------------

-------------------

-------------------

-------------च दुर्लभम् ॥

**XIV. दशवाक्यैः उत्तरं कर्नाटकभाषया संस्कृतभाषया आङ्ग्लभाषया वा लिखत ।** **3 x4=12**

54. वृत्रवधोपायं ज्ञातुम् आगतान् देवान् ब्रह्मदेवः किम् अवदत् ?

55. हनूमतः जननवृत्तान्तं पद्यानुगुणं लिखत ।

56. भगवान् रमणमहर्षिः महर्षित्वं स्वजीवनेन दर्शितवान् – विवृणुत ।

अथवा

अमरनाथगुहाविषये का पुराणकथा अस्ति ?

**XV. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत ।** **1 x 4 = 4**

57. कुरुक्षेत्रे कर्णार्जुनयोः भीषणं युद्धं प्रवृत्तम् । उभयोः वीरतां दृष्ट्वा सर्वे आश्चर्यचकिताः । युद्धकाले अर्जुनस्य बाणप्रहारेण कर्णस्य रथः एकं योजनं प्रतिसरति स्म । किन्तु कर्णस्य बाणप्रहारेण अर्जुनस्य रथः किञ्चिन्मात्रं प्रतिसरति स्म । युद्धसमये अर्जुनस्य सारथिः कृष्णः आसीत् । कृष्णः एतत् सर्वं दृष्ट्वा वारं वारं "साधु कर्ण साधु" इति कर्णं साधुवादैः अभिनन्दति स्म । इदं श्रुत्वा कुपितः अर्जुनः कृष्णम् अपृच्छत् । " हे मधुसूदन ! मम बाणप्रहारेण कर्णस्य रथः योजनपरिमितं दूरं गच्छति तथापि मह्यं साधुवादं न वदति । भवान् किमर्थम् एवं वदति इति अपृच्छत् ।

प्रश्नाः

१. कयोः मध्ये भीषणं युद्धं प्रावर्तत ?

२. कर्णस्य रथः कियत् दूरं प्रतिसरति स्म ?

३. अर्जुनस्य सारथिः कः ?

४. कृष्णः कर्णं कैः अभिनन्दति स्म ?

**XVI पत्रं लिखत ।** **1 x 5 =5**

58. भवतः गृहस्य देवकार्ये भागं गृहीतुं दिनद्वयस्य विरामं प्रार्थ्य कक्ष्याध्यापकं प्रति पत्रं लिखत ।

अथवा

शालाप्रवासस्य वर्णनं कृत्वा अग्रजं प्रति पत्रं लिखत ।

**XVII. दशवाक्यैः प्रबन्धं लिखत ।** **1 x 5 =5**

59. दूरदर्शनम् अथवा स्वातन्त्र्योत्सवः

***************